# Shri Gajanana Stuti Vighnasurakrita

# વિઘ્નાસુરકૃતા શ્રીગજાનનસ્તુતિઃ

## Document Information

Text title : Shri Gajanana Stuti Vighnasurakrita

File name : gajAnanastutiHvighnAsurakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM chaturthaH khaNDaH | adhyAyaH 51 | 4.51. 15-29||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# વિઘ્નાસુરકૃતા શ્રીગજાનનસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
વિઘ્નાસુર ઉવાચ ।
નમસ્તે ગણનાથાય ગજાનનસ્વરૂપિણે ।
યોગાય યોગનાથાય યોગિભ્યો યોગદાયિને ॥ ૧૫॥
અનાકારાય સાકારરૂપાય તે નમો નમઃ ।
નાનાભેદવિહીનાય ભેદાનાં પતયે નમઃ ॥ ૧૬॥
વિઘ્નેશાય પરેશાય કાલભીતિહરાય તે ।
હેરમ્બાય પરેષાં વૈ પરાત્પર નમો નમઃ ॥ ૧૭॥
અનાદયે હ્યનાથાય સર્વેષામાદિમૂર્તયે ।
ભક્તેશાય સદા ભક્તવાઞ્છિતપ્રદ તે નમઃ ॥ ૧૮॥
સ્વાનન્દવાસિને તુભ્યં મૂષકધ્વજિને નમઃ ।
મૂષકોપરિસંસ્થાય ઢુણ્ઢિરાજાય તે નમઃ ॥ ૧૯॥
આદિમધ્યાન્તહીનાયાદિમધ્યાન્તસ્વરૂપિણે ।
ગજવક્ત્રાય વૈ તુભ્યં સર્વપૂજ્યાય તે નમઃ ॥ ૨૦॥
સિદ્ધિબુદ્ધિસ્વરૂપાય સિદ્ધિબુદ્ધિપ્રદાય ચ ।
સિદ્ધિબુદ્ધિપતે તુભ્યં મહોદર નમો નમઃ ॥ ૨૧॥
અમેયમાયાતિગમૂર્તયેઽપિ તે સદા સુશાન્તિપ્રદપૂર્ણમૂર્તયે ।
મનોવચોહીનમયાય તેજસે મનોવચોયુક્તકલાય તે નમઃ ॥ ૨૨॥
અજ્ઞાનદોષેણ કૃતોઽપરાધો હેરમ્બ તં ક્ષન્તુમિહાર્હસિ ત્વમ્ ।
રક્ષસ્વ માં ભક્તિયુતં દયાબ્ધે શ્રેષ્ઠં વરં દેહિ પરેશપાલ ॥ ૨૩॥
અધુના હિ મયા બુદ્ધં સ્વરૂપં તે ગજાનન ।
યોગાકારમયોઽસિ ત્વં તતોઽહં નિર્જિતસ્ત્વયા ॥ ૨૪॥
ત્વાં વિના કા સમર્થઃ સ્યાત્ કાલં કલયતાં પ્રભુમ્ ।
જેતું ધન્યઃ કૃતો નાથ પાદપદ્મસ્ય દર્શનાત્ ॥ ૨૫॥
એવં સ્તુત્વા મહાવિઘ્નઃ પ્રણનામ ગજાનનમ્ ।

તમુત્થાપ્ય જગાદેદં વચનં સર્વદઃ પરઃ ॥ ૨૬॥

(ફલશ્રુતિઃ)

શ્રીગજાનન ઉવાચ ।

ત્વયા કૃતં મદીયં વૈ સ્તોત્રં સર્વપ્રદં ભવેત્ ।

કાલસ્ય ન ભયં તેષાં પઠતાં શ‍ૃણ્વતાં સદા ॥ ૨૭॥

યદ્યદિચ્છતિ તત્તદ્વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ।

મહાયોગપ્રદં ચાસ્તુ સ્તોત્રં મત્પ્રીતિવર્ધનમ્ ॥ ૨૮॥

હન્તું ત્વાં ક્રોધસંયુક્ત આગતોઽહં ન સંશયઃ ।

વાઞ્છિતં વૃણુ નો હન્મિ અધુના શરણાર્થિનમ્ ॥ ૨૯॥

ઇતિ વિઘ્નાસુરકૃતા શ્રીગજાનનસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં ચતુર્થઃ ખણ્ડઃ । અધ્યાયઃ ૫૧ । ૪.૫૧। ૧૫-૨૯॥

- .. mudgalapurANaM chaturthaH khaNDaH . adhyAyaH 51 . 4.51. 15-29..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Gajanana Stuti Vighnasurakrita*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*